# नवग्रह सुप्रभातम्

{॥ नवग्रह सुप्रभातम् ॥}

सूर्यः

पूर्वापराद्रि सञ्चार चराचरविकासक ।

उत्तिष्ठ लोककल्याण सूर्यनारायण प्रभो ॥ १॥ कुरु कल्याण

सप्ताश्वरश्मिरथ सन्ततलोकचार

श्री द्वादशात्मकमनीयत्रिमूर्तिरूप । मनोज्ञत्रिमूर्तिरूप

सन्ध्यात्रयार्चित वरेण्य दिवाकरेशा

श्री सूर्यदेव भगवन् कुरु सुप्रभातम् ॥ २॥

अज्ञानगाहतमसःपटलं विदार्य

ज्ञानातपेन परिपोषयसीह लोकम् ।

आरोग्यभाग्यमति सम्प्रददासि भानो

श्री सूर्यदेव भगवन् कुरु सुप्रभातम् ॥ ३॥

छायापते सकलमानवकर्मसाक्षिन्

सिंहाख्यराश्यधिप पापविनाशकारिन् ।

पीडोपशान्तिकर पावन काञ्चनाभ

श्री सूर्यदेव भगवन् कुरु सुप्रभातम् ॥ ४॥

चन्द्र

सर्वलोकसमुल्हास शङ्करप्रियभूषणा ।

उत्तिष्ठ रोहिणीकान्त चन्द्रदेव नमोऽस्तुते ॥ ५॥

इन्द्रादि लोकपरिपालक कीर्तिपात्र

केयूरहारमकुटादि मनोज्ञगात्र ।

लक्ष्मीसहोदर दशाश्वरथप्रयाण

श्री चन्द्रदेव कुमुदप्रिय सुप्रभातम् ॥ ६॥

श्री वेङ्कटेशनयन स्मरमुख्यशिष्य

वन्दारुभक्तमनसामुपशाम्य पीदाम् ।

लोकान् निशाचर सदा परिपालय त्वम्

श्री चन्द्रदेव कुमुदप्रिय सुप्रभातम् ॥ ७॥

नीहारकान्तिकमनीयकलाप्रपूर्ण

पीयूषवृष्टिपरिपोषितजीवलोक ।

सस्यादिवर्धक शशाङ्क विराण्मनोज

श्री चन्द्रदेव कुमुदप्रिय सुप्रभातम् ॥ ८॥

आङ्गारक

मेरोः प्रदक्षिणं कुर्वन् जीवलोकं च रक्षसि ।

अङ्गारक ग्रहोत्तिष्ठ रोगपीडोपशान्तये ॥ ९॥

आरोग्यभाग्यममितं वितरन् महात्मन्
रोगाद्विमोचयसि सन्ततमात्मभक्तान् ।
आनन्दमाकलय मङ्गलकारक त्वम्
मेषेन्द्रवाहन कुजग्रह सुप्रभातम् ॥ १०॥

सूर्यस्य दक्षिणदिशामधिसंवदानः
कारुण्यलोचन विशालदृशानुगृह्य ।
त्वद्ध्यानतत्परजनाननृणान् करोषि
मेषेन्द्रवाहन कुजग्रह सुप्रभातम् ॥ ११॥

बुध

बुध प्राज्ञ बुधाराध्य सिंहवाहन सोमज ।
उत्तिष्ठ जगतां मित्र बुद्धिपीडोपशान्तये ॥ १२॥

हे पीतवर्ण सुमनोहरकान्तिकाय
पीताम्बर प्रमुदिताखिललोकसेव्य ।
श्रीचन्द्रशेखरसमाश्रितरक्षकस्त्वम् ।
ताराशशाङ्कज बुधग्रह सुप्रभातम् ॥ १३॥

द्राक्षागुलुच्छपदबन्धकवित्वदातः
आनन्दसंहितविधूतसमस्तपाप ।
कन्यापते मिथुनराशिपते नमस्ते

ताराशशाङ्कज बुधग्रह सुप्रभातम् ॥ १४॥

गुरु

धनुर्मीनादि देवेश देवतानां महागुरो ।

ब्रह्मजात समुत्तिष्ठ पुत्रपीडोपशान्तये ॥ १५॥

इन्द्रादि देवबहुमानितपुत्रकार

आचार्यवर्य जगतां श्रितकल्पपूज ।

तारापते सकलसन्नुतधीप्रभाव

श्रीधीष्पतिग्रह जनावन सुप्रभातम् ॥ १६॥

पद्मासनस्थ कनकाम्बर दीनबन्धो

भक्तार्तिहार सुखकारक नीतिकर्तः ।

वाग्रूपभेदसुविकासक पण्डितेज्य

श्रीधीष्पतिग्रह जनावन सुप्रभातम् ॥ १७॥

शुक्र

तुलावृषभराशीश पञ्चकोनस्थितग्रह ।

शुक्रग्रह समुत्तिष्ठा पत्नीपीडोपशान्तये ॥ १८॥

श्वेताम्बरादि बहुशोभितगौरगात्र

ज्ञानैकनेत्र कविसन्नुतिपात्र मित्र ।

प्रज्ञाविशेषपरिपालितदैत्यलोक

हे शुक्रदेव भगवन् कुरु सुप्रभातम् ॥ १९॥

सञ्जीविनीप्रमुखमन्त्ररहस्यवेदिन्

तत्त्वाखिलज्ञ रमणीयरथाधिरूढ ।

राज्यारियोगकर दैत्यहितोपदेशिन्

हे शुक्रदेव भगवन् कुरु सुप्रभातम् ॥ २०॥

शनैश्चर

मण्डले धनुराकारे संस्थितः सूर्यनन्दन ।

नीलदेह समुत्तिष्ठ प्राणपीडोपशान्तये ॥ २१॥

चापासनस्थ वरगृध्ररथप्रयाण ??

कालाञ्जनाभ यमसोदर काकवाह ।

भक्तप्रजावनसुदीक्षित शम्भुसेविन्

श्री भास्करात्मज शनैश्चर सुप्रभातम् ॥ २२॥

संसारसक्तजनदुष्परिस्वप्रदातः

भक्तिप्रपन्नजनमङ्गलसन्निधातः ।

श्रीपार्वतीपतिदयामयदृष्टिप्रवाच var?? दयाकर दृष्टिपूत?

श्री भास्करात्मज शनैश्चर सुप्रभातम् ॥ २३॥

तैलान्नदीपतिलनीलसुपुष्पसक्तः

कुम्भादिपत्यमकराधिपये वहित्वम् ।

निर्भीक कामित फलप्रद नीलवासः

श्री भास्करात्मज शनैश्चर सुप्रभातम् ॥ २२॥

राहु

गौहुते अधिदेवता राहो सर्पाः प्रत्यधिदेवताः ।

राहुग्रह समुत्तिष्ठा नेत्रपीडोपशान्तये ॥ २५॥

नीलाम्बरादि समलङ्कृत सैंहिकेय

ज्ञानप्रसन्न वरदानसुखावहस्त्वम् । var भक्त प्रपन्न

शूर्पासनस्थ सुजनावह सौम्यरूप ??

राहुग्रहप्रवर नेत्रद सुप्रभातम् ॥ २६॥

सिंहाधिपश्च तनु सिंहगतासनस्त्वम् var जटासनस्त्वम्

मेर्वप्रदक्षिण चरदुत्तरकायशोभिम् ।

आदित्यचन्द्रग्रसनाग्रहलग्नचित्त

राहुग्रहप्रवर नेत्रद सुप्रभातम् ॥ २७॥

केतुः

चित्रगुप्तब्रह्मदेवौ अधिप्रत्यधिदेवते ।

केतुग्रह समुत्तिष्ठ ज्ञानपीडोपशान्तये ॥ २८॥

चित्रं च ते ध्वजरथादि समस्तमेव

सयेतरं च गमनं परितस्तु मेरुम् ।

सूर्यस्य वायुदितिसञ्चरतीह नित्यम्

केतुग्रहप्रवर मोक्षद सुप्रभातम् ॥ २९॥

त्वन्मन्त्रजापपरसज्जन संस्तुतस्सन्

ज्ञानं तनोशि विमलं परिहार्य पीडाम् ।

एवम् हि सन्ततमनन्तदयां कुरु त्वम्

केतुग्रहप्रवर मोक्षद सुप्रभातम् ॥ ३०॥

फलश्रुति

नित्यं नवग्रहदेवतानामिह सुप्रभातम् ।

ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ॥

तेशां प्रभातसमये स्मृतिरङ्गभाजाम् । ??

प्रज्ञां परार्धसुलभां परमां प्रसूते ॥

आदित्याय च सोमाय मङ्गलाय बुधाय च ।

गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः ॥

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Navagraha Suprabhatam Lyrics in Devanagari PDF
% File name : navagrahasuprabhAtam.itx
% Category : suprabhAta
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Lakshmi R.S. lakish at gmail.com, NA, PSAEaswaran
% Proofread by : PSAEaswaran. (KSR, Avinash Sathaye were involved in the discussion.)
% Latest update : September 17, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website